Shodhshauryam, International Scientific Refereed Research Journal
© 2018 SHISRRJ | Volume 1 | Issue 4 | ISSN : 2581- 6306

# बौद्धदर्शनस्य विकासे आचार्यशान्तरक्षितस्य योगदानम्

**डॉ. प्रदीपकुमारद्विवेदी**
बौद्धदर्शनविभागः, राष्ट्रियसंस्कृतसंस्थानम्, एकलव्य परिसरः, अगरतला, त्रिपुरा ।

**सारांशः-** आचार्यशान्तरक्षितः भारतदेशस्य महानबौद्धदार्शनिकः आसीत्। यद्यपि दुर्भाग्यवशात् तस्य जीवनविषये कोऽपि व्यक्तिगतलेखः नास्ति, तथापि तस्य जीवनविषये तिब्बती-स्रोतेन ज्ञायते। तिब्बतदेशे तस्य नाम त्रयम् मिलति- शान्तरक्षितः शान्तिरक्षितः एवञ्च आचार्य बोधिसत्त्वः। आचार्यशान्तरक्षितेन बौद्धदर्शनस्य विकासे महत्त्वपूर्णं योगदानं प्रदत्तम्। अस्मिन् शोधपत्रे आचार्यस्य जन्मकालः, स्थानम्, व्यक्तित्वं कृतित्वं, दार्शनिकसंप्रदायः, सिद्धान्तः, लेखन-शैलिविषयकी चर्चा वर्तते।

**मुख्यशब्दः –** आचार्यशान्तरक्षितः, महानबौद्धदार्शनिकः, सिद्धान्तः, योगदानम्।

---

**जन्मकालः स्थानञ्च-** सर्वप्रथमं रायबहादुरशरदचन्द्रदासद्वारा 'इण्डियन पण्डित इन तिब्बत' इति स्वलेखे आचार्यशान्तरक्षितस्य जीवनवृत्तविषये वर्णनं कृतम्। यस्य लेखस्य प्रकाशनकार्यं 'बुद्धिस्ट टेक्स्ट सोसाइटी' इति संस्थामाध्यमेन अभवत्। डॉ. विद्याभूषणमहोदयानुसारम् आचार्यशान्तरक्षितस्य जन्म 'जहोर' नामकस्थाने धनाढ्यपरिवारेऽभवत्। एल् ए वड्डेलमहोदयेन 'लामिज्म' इति ग्रन्थे जाहोरस्य नाम 'लाहोर' उक्तं किन्तु इदं विवरणं सम्यग् नास्ति, यतोहि जहोरनामकस्थानं बङ्गालक्षेत्रे स्यात्। जहोरनामकस्थानं विक्रमपुरस्य अन्तर्गतमासीत्। तत् स्थानं तस्मिन् समये बङ्गालप्रदेशे बौद्धानां प्रमुखस्थानम् आसीत्। तत्रैव महानबौद्धसमाजसुधारकः दीपांकरश्रीज्ञानः अपि अभूत्। विक्रमपुरतहसीलस्य अन्तर्गतः एक लघुग्रामः 'साभार' उच्चारणे तिब्बतिभाषायां 'जहोर' इव साम्यता अस्ति अतः प्रतीयते यत् अत्रैव शान्तरक्षितस्य जन्म अभूत्।[1] केचित् विद्वांसः मन्यन्ते यत् आचार्यशान्तरक्षितस्य जन्म 680 शताब्द्यां वर्तमाने बिहारराज्ये भागलपुरजनपदस्य पूर्वीभागे स्थितः 'सहीर' नामकग्रामे एकः ब्राह्मणपरिवारेऽभवत्। अस्य नाम बाल्यकाले 'भगल' आसीत्। ब्राह्मणपरिवारे जन्मग्रहणात् प्रारम्भिकशिक्षा ब्राह्मणग्रन्थानां ज्ञानेन सम्बद्धासीत्। ब्राह्मणग्रन्थानामध्ययनपश्चात् नालन्दा गतवान् शान्तरक्षिताचार्यः। नालन्दायां इत्सिंगमहोदयेन सह बौद्धग्रन्थानाम् अध्ययनं कृतम्। पश्चात् बौद्धाचार्यज्ञानगर्भद्वारा प्रव्रज्या स्वीकृत्य बौद्धः अभूत्, तदैव अस्य नामकरणं 'शान्तरक्षितः' इति कृतम्। अस्य पाण्डित्यपरिचयः 'तत्त्वसंग्रहे' एवञ्च 'माध्यमिकालङ्कारकारिकायाम्' सम्यग् रूपेण मिलति। आचार्यशान्तरक्षितः नालन्दायाः मौलिकप्रतिभासम्पन्नाचार्य एवञ्च बौद्धन्यायपरम्परायाः महानदार्शनिकोऽपि आसीत्।[2] तत्त्वसङ्ग्रहे अनेकाचार्याणां मतानामुल्लेखः प्राप्नोति। अस्याधारे आचार्यशान्तरक्षितस्य समयः 705 ई. तः 762 ई. पर्यन्तं (अष्टम् शताब्दी) मन्यते।

**आचार्यशान्तरक्षितस्य व्यक्तित्वम्-** बौद्धदर्शनस्य योगाचारमतावलम्बी-शान्तरक्षिताचार्यः आधुनिकानां दर्शनानुशीलनपराणां तमसाच्छन्नां गवेषणापद्धतिं दीपयन् महान्तमुपकारमकरोत्। बहुनां तत्कालप्रसिद्धानामपि अधुनालुप्तपरिचयानां दार्शनिकानां मतानि पूर्वपक्षतया स्वपक्षोद्बलकतया वा संगृह्य तत्त्वसंग्रहाभिधं ग्रन्थरत्नं पुरस्तादस्माकमयं प्रस्तौति। एतस्य चाभावे केषाञ्चनात्र चर्चितदार्शनिकाणां परिचयस्य मतवादस्य च का कथा नामज्ञानमपि दुर्लभमासीत्। तादृशेष्वेव सन्ति संस्मरणीयाः

आत्मवादस्य साधनपराः न्यायाचार्याः शङ्कराविद्धकर्णभाविविक्ताभिधानाः। ऐतिहासिकदृष्ट्या शास्त्रीयविचारदृष्ट्या चैतेषां कोऽपि परिचयो नोपलभ्यते।

शान्तरक्षिताचार्येण पूर्वपक्षयै तेषां सन्दर्भाजातानि समुद्धतानि तत्कालस्थितव्याख्यात्रा कमलशीलने च सविस्तरं तेषां सिद्धान्तानां व्याख्याता इति स्वसमयोत्कृष्टतै तेषां विद्योतते।[3] तत्त्वसंग्रहस्य पञ्जिकायाः लेखकः आचार्यकमलशीलः अभिसमयालङ्कारस्य च टीकायाः लेखकः आचार्यहरिभद्रः अस्य प्रमुखः शिष्यः स्तः।

आचार्यशान्तरक्षितः अष्टम् शताब्देः एकः सुविख्यातः बौद्ध-दार्शनिकः आसीत्। अवैदिकचिन्तनधारया सह सम्बद्धत्त्वेन अद्य सामान्यभारतीयविद्वांसः अस्य विषये अविज्ञः, परन्तु अष्टम शताब्याम् आचार्यस्य ख्यातिः बौद्ध-दार्शनिकरूपे देश-देशान्तरेऽऽसीत्।

शान्तरक्षितस्य मनांसि एवञ्च हृदये बौद्धधर्मं प्रति समर्पण एवं त्यागस्य प्रबलभावनाऽऽसीत्। अस्य ज्ञानम् एवञ्च पाण्डित्यस्य प्रभावेन तिब्बतदेशस्य सम्राटः स्नोङ्-गचन्-गस्नम्-पो[4] द्वारा बौद्धधर्मस्य प्रचार-प्रसाराय आचार्यशान्तरक्षितं नालन्दातः आमन्त्रितवान् एवञ्च आचार्यशान्तरक्षितः बौद्धधर्मस्य प्रचार-प्रसाराय नालन्दा तः नेपालदेशे, नेपालदेशतः तिब्बतदेशे गतवान्। शान्तरक्षितेन नेपालदेशेऽपि बौद्धधर्मोपदेशस्य कार्यं कृतम्।[5] तिब्बतदेशस्य राजपुरुषेण ज्ञानेन्द्रेण सह शान्तरक्षिताचार्यः सर्वप्रथम तत्र गतवान्। तत्र आचार्यस्य अत्यधिकस्वागतसत्कारम् अभूत्। तत्रैव शान्तरक्षिताचार्यः बोधिसत्त्वः शान्तरक्षितस्य च नाम्ना प्रसिद्धोऽभूत्। अस्य उपदेशस्य प्रभावेन सहस्राधिकैः जनैः बौद्धधर्मं स्वीकृतम्। तस्मिन् समये एव तिब्बतदेशे महाव्याधिः प्रसारिता अतः राजपरामर्शेण शान्तरक्षितः तिब्बतदेशतः नेपालदेशं प्रति आगच्छति स्म। द्वितीयं बारं महाव्याधिः समाप्तिः पश्चात् तिब्बतदेशस्य राजा खि-स्रोङ् -ल्दे-ब्चनस्य आमन्त्रणे आचार्यशान्तरक्षितः पुनः तिब्बतदेशे गतवान्। राज्ञ इच्छासीत् यत् तिब्बतदेशस्य जनान् बौद्धधर्मः स्वीकारयित्वा भिक्षुसङ्घस्य स्थापना कृत्वा बौद्धधर्मस्य प्रचार-प्रसारं भवेत् एकञ्च तत्र बौद्धविहार अपि स्थापयेत्। अतः शान्तरक्षितेन राज्ञ इच्छानुसारं तत्र भिक्षुसङ्घस्य स्थापना कृता एवञ्च 'साम्ये' नामक विशालविहारस्य निर्माणकार्यमपि कृतम्। तिब्बतदेशस्य अयं प्रथमविहारोऽऽसीत्, यः पश्चात्काले बौद्धधर्मस्य प्रचार-प्रसारे विशेषसहायकः अभूत्।[6] शान्तरक्षितः नालन्दामहाविद्या-विहारस्य आचार्यपदमपि अलङ्कृतवान्। जीवनस्य अन्तकाले एव सः तस्यैव राज्ञः आमन्त्रणे तिब्बतदेशे गतवान् एवं च तत्रैव तस्य देहावसानमभवत्। अष्टम् ख्रीष्टाब्दः प्रायः अस्य कालः मन्यते।

**सम्प्रदाय**:- सर्वे धर्माः परमार्थतः (सत्यतः) सन्नास्ति एवञ्च संवृत्तितः (व्यवहारतः) असदपि नास्ति- ईदृशी मान्यता यस्य वर्तते सः माध्यमिकः इत्युच्यते। माध्यमिकः द्वयोः प्रकारयोः भवतः स्वातन्त्रिकमाध्यमिकः एवञ्च प्रासङ्गिकमाध्यमिकः। व्यावहारिकसत्ताविषये मतभेदेन स्वातन्त्रिकमाध्यमिकस्य भेदद्वयमस्ति- सूत्रचार- स्वातन्त्रिकमाध्यमिक एवञ्च योगाचार-स्वातन्त्रिकमाध्यमिकः।

योगाचार-स्वातन्त्रिकमाध्यमिकसम्प्रदायस्य जनाः निःस्वभावतावादिमाध्यमिकः भूते सत्यपि व्यवहारस्य स्थापना योगाचारदर्शनमिव कुर्वन्ति, अतः ते 'योगाचार-स्वातन्त्रिक- माध्यमिकः' इत्युच्यन्ते। ते व्यवहारे बाह्यार्थसत्ता न स्वीकुर्वन्ति, अत्र त्रयः धातून् (कामधातुः रूपधातुः एवञ्च अरूपधातुः) विज्ञप्तिमात्रं व्यवस्थाप्यन्ते। आचार्यशान्तरक्षितः कमलशीलादिश्च अस्य मतस्य प्रमुखाचार्याः सन्ति।

आचार्यशान्तरक्षितः व्यवहारे स्वलक्षणसत्ता स्वीकरोति। तेनैव योगाचार- स्वातन्त्रिकमाध्यमिकदर्शनप्रस्थानस्य स्थापना कृता।[7] शान्तरक्षितेन स्वमाध्यमकालङ्कारभाष्ये कार्य-कारणस्य सांवृत्तिसत्तास्वरूपे विचार्यते। तत्र तेन पूर्वपक्षः उपस्थाप्यते यत् संवृतिसत् धर्ममात्रं चित्तचैत्तात्मकं (विज्ञप्तिमात्रत्मकं) अस्ति वा? तस्य बाह्यार्थतः सत्ता भवति वा? सः अस्य समाधानं करोति यत् तस्य बाह्यार्थतः सत्ता कथमपि न भवति। अर्थात् तस्य बाह्यसत्ता नितान्तं-युक्तिविरुद्धमस्ति। अस्य कृते आचार्यशान्तरक्षितेन सहोपलम्भयुक्तेः प्रयोगः तत्र क्रियते, एवञ्च स्वप्नमायादिभिः दृष्टान्तैः व्यवहारतः विज्ञप्तिमात्रात्मकता प्रतिपादिता।[8]

व्यवहारे विज्ञप्तिमात्रस्य ज्ञानेन (बाह्यार्थाभाव:) एवञ्च परमार्थत: विज्ञप्तिमात्रस्यापि अभावस्य ज्ञानेन माध्यमिकशब्दस्य वास्तविकाभिप्राय: ज्ञायते। आचार्यशान्तरक्षितस्य मतमस्ति यत् व्यवहारे विज्ञप्तिमात्रता आर्यनागार्जुनस्य सिद्धान्तोऽस्ति। स्वास्य कथनस्य पुष्टिकरणाय नागार्जुनस्य युक्तिषष्टिकाग्रन्थस्य कारिका प्रमाणरूपेण प्रस्तूयते। यथा –

**"महाभूतादि विज्ञाने प्रोक्तं समवरुध्यते।**
**तज्ज्ञाने विगमं याति ननु मिथ्या विकल्पितम्।।"**

अर्थात् महाभूतादि ये ख्यातधर्मा: सन्ति ते सर्वे धर्मा: विज्ञाने सङ्ग्रहीता: सन्ति। अनेन ज्ञानेन मिथ्याज्ञानं वियुक्तं भवति।[9] आचार्यशान्तरक्षित: स्व-रचनासु बाह्यार्थानां सत्ता-स्वीकर्तु: आचार्यभावविवेकस्य खण्डनं कृतवान् व्यवहारे च विज्ञप्तिमात्रताया: स्थापनाकरोत्। तस्य मतानुसारमार्यनागार्जुनस्य अपि अयम् एव वास्तविक: अभिप्रयोऽस्ति। यद्यपि आचार्यशान्तरक्षित: बाह्यार्थं न मन्यते तथापि बाह्यार्थशून्यता तस्य मतानुसारं परमार्थसत्यं नास्ति, यथा यत् विज्ञानवादी तं परमार्थसत्यं मन्यते, अपितु स: संवृत्तिसत्यं, व्यवहारसत्यं वा अस्ति। आचार्यभावविवेकस्य सदृश: स: अपि 'परमार्थत: नि:स्वभावतां' परमार्थसत्यं मन्यते। व्यवहारे स: साकार-विज्ञानवादी अस्ति। विज्ञानवादस्य शान्तरक्षितोपरि अत्यधिक: प्रभाव: अस्ति।

स: चन्द्रकीर्ते: नि:स्वभावतां परमार्थसत्यं न मन्यते। आचार्यभावविवेकस्य सदृश: स: स्वतन्त्रानुमानस्य प्रयोगमपि स्वीकरोत्। स: आलयविज्ञानं न मन्यते, स्वसंवेदनस्य प्रतिपादनं तेन स्वरचनासु कृतम् अत: स: स्वसंवेदनं स्वीकरोत्। यद्यपि विद्वांस आचार्यं शान्तरक्षितं स्वातन्त्रिकमाध्यमिकाचक्षे। परन्तु नात्रचार्येण स्वातन्त्रिकमाध्यमिकप्रक्रिया-क्वचिदपि विस्तरेण निरूपिता। सा प्रक्रिया मन्ये स्वरचितेऽन्यस्मिन् मध्यमकालङ्कारनामके, परमार्थविनिश्चये वा ग्रन्थे विवृता भवेदिति।[10]

**आचार्यशान्तरक्षितस्य कृतित्वम्-** आचार्यशान्तरक्षितेन न केवलम् उपदेशै: बौद्धधर्मस्य प्रचार-प्रसारकार्यं कृतम् अपितु अनेकबौद्धदार्शनिकग्रन्थानां रचना अपि कृता:। तस्य एकमात्र-ग्रन्थ: 'तत्त्वसंग्रह:' संस्कृतभाषायाम् उपलब्ध:। तेन 'मध्यमकालघड्ढारकारिका' नामक: माध्यमिकग्रन्थ: तस्योपरि च स्ववृत्ते: अपि रचना कृता। एतस्मिन् एव तेन स्व-विशिष्ट: माध्यमिक-दृष्टिकोणं स्पष्टम् अकरोत्। यद्यपि ते ग्रन्था: संस्कृतभाषायाम् उपलब्धा: न सन्ति। तिब्बती-तंजूरे आचार्यशान्तरक्षितस्य निम्नग्रन्थानाम् उल्लेख: प्राप्यते। आचार्यशान्तरक्षित: तिब्बतदेशे बोधिसत्त्व: बहुश्रुत: शान्तिरक्षितश्च इति नाम्ना व्यवह्रीयते।

**(1)** बोधिसत्त्वस्य नाम्ना निम्नग्रन्था: सन्ति – (i) वज्रविदारणीनामधारणीटीका। (ii) सर्वतथागत-पूर्वप्रणिधान-विशेषविस्तारसूत्रन्तोपदेश:। (iii) सप्ततथागत-पूर्वप्रणिधान-विशेषविस्तार-कल्पवचनविधि:। (iv) सप्ततथागत-प्रणिधानविशेष-विस्तार-नामसूत्रन्तवचनम्।

**(2)** आचार्यबहुश्रुतस्य एवञ्च शान्तिरक्षितस्य ये ग्रन्था: सन्ति- (i) वज्रधर-सङ्गीत-भगवत-स्तोत्रटीका। (ii) अष्टतथागत-स्तोत्रम्। (iii) हेवज्रोद्भव-कुरुकुल्लाया: पञ्चमहोपदेश:। (iv) तत्त्वसिद्धि: ग्रन्थस्यापि उल्लेख: मिलति। यस्मिन् महासुखवादस्य वर्णनमस्ति। यत: पण्डितहरप्रसादशास्त्रिणा सङ्ग्रहीत: पाण्डुलिपिषु उपलब्ध: अस्ति।

**(3)** आचार्यशान्तरक्षितस्य नाम्ना ये ग्रन्था: सन्ति- (i) तत्त्वसङ्ग्रह: (ii) मध्यमकालङ्कार-कारिका (iii) मध्यमकालङ्कार-कारिका-स्ववृत्ति: (iv) वादन्याय-विपिञ्चतार्थ। अयं ग्रन्थ: आचार्यधर्मकीर्ते: रचना 'वादन्यायस्य' विस्तृतटीका अस्ति। (v) हेतुचक्रामरु आचार्यशान्तरक्षितेन माध्यमकालङ्कारकारिका एवञ्च 'स्ववृत्ति:' माध्यमेन योगाचार-स्वातन्त्रिक-माध्यमिकशाखाया: प्रवर्तनं कृतम्। आचार्यशान्तरक्षित: व्यवहारे साधक: प्रसिद्धतान्त्रिकश्चापि आसीत्।

तत्त्वसङ्ग्रहे नामके ग्रन्थे ग्रन्थकारेण स्वदृष्ट्या ब्राह्मणानां तथा बौद्धानामन्य सम्प्रदायानां मतानां विस्तरेण खण्डनं कृतम्। अस्य शिष्यकमलशीलेन अस्य तत्त्वसङ्ग्रहग्रन्थस्योपरि टीका लिखितम्, येन अध्ययनेन इदं ज्ञायते यत् ग्रन्थकारेण शान्तरक्षितेन वसुमित्र-धर्मत्रत- घोषक-संघभद्र-वसुबन्धु-दिग्नाग-धर्मकीर्त्यादिः प्रौढबौद्धाचार्याणां मते आक्षेपं कृतम्। ब्राह्मणदर्शनेषु साख्य-न्याय-मीमांसायाश्च पर्याप्तखण्डनं कृतम्। ग्रन्थोऽयं शान्तरक्षितस्य व्यापकपाण्डित्यस्य अलौकिकप्रतिभायाश्च पर्याप्तपरिचायकोऽस्ति।

**दार्शनिकयोगदानम्-** बौद्ध-दार्शनिकसिद्धान्तेषु आचार्यशान्तरक्षितस्य क्षणिकवादस्य सिद्धान्तः अत्यन्तोल्लेखनीय वर्तते। अयं सिद्धान्तः स्पष्टरूपेण तस्य सत् यथार्थस्य वा दर्शनं कारयति यः बौद्धन्यायपरम्परायाः चिन्तन-विषयोऽस्ति। शान्तरक्षिताचार्यः क्षणिकवादसिद्धान्तस्य विषये उच्यते यत् प्रत्येकस्मिन् क्षणे तस्य सत्तायाः किमपि लेशमात्रमपि अवशिष्टं न भवति यस्य पूर्वक्षणे अस्तित्वं विद्यते। प्रत्येकं क्षणिकवस्तुं स्व निष्पन्नत्वेन सह विनष्टमपि जातम्। यतोहि तस्य क्षणस्य सत्ता अपरक्षणपर्यन्तं न तिष्ठति। तस्य विनाशाय परिवर्तनाय च अन्य कस्यापि कारणस्य आवश्यकता न भवति। इमं क्षणिकता विनाशो वा अपि उच्यते।

**अनुमानसिद्धान्तः**-आचार्यशान्तरक्षितः अनुमानप्रमाणस्य भेदद्वयं स्वीकरोति- स्वार्थानुमानं परार्थानुमानञ्च। स्वार्थं यत् त्रिरूपात् लिङ्गात् पक्षधर्मत्वम्, सपक्षे सत्त्वम्, विपक्षात् च सर्वतो व्यावृतिः - इति एवं लक्षणाद् अनुमेयार्थविषयं ज्ञानं तदात्मकं बोद्धव्यम्। परार्थं तु- यथोक्त त्रिरूप-लिङ्गप्रकाशकवचनात्मकं द्रष्टव्यम्।[11] परार्थानुमानम् अन्यान् जनान् स्वज्ञातज्ञानस्य प्रतिपादनं कारयति। शान्तरक्षितेन धर्मकीर्तेः अनुमानविषयकलक्षणानां समर्थनं कृतम्।

**शैली-** आचार्यशान्तरक्षितस्य लेखनशैली ईदृशी आसीत् यत् तस्य लेखनस्य प्रत्येकपंक्तिद्वारा विशिष्टज्ञानं स्पष्टरूपेण प्राप्नोति। सः प्रत्येकपद्यांशेषु शब्दान् अनेनप्रकारेण व्यवस्थितं करोति स्म यत् ते एकस्य पश्चाद् द्वितीयस्य तार्किकक्रमेण अनुगमनं कुर्वन्ति, तान् शब्दान् परिवर्तनं कर्तुं शक्नुवन्ति। आत्मवादप्रसङ्गे शान्तरक्षितः मुख्यतः उद्योतकराचार्य गौणतः इह निर्दिष्टानाचार्याश्च प्रतिवक्तुं समवृणोत्। इदमवधारणीयमिह- वार्तिककारस्योद्द्योतकरस्या अन्येषां वाचार्याणां स्वयमुद्भावितस्य वा अध्यात्मवादं युक्तिकदम्बस्य निराकरणायैव केवलं न यतते, अपि तु मूलभूतसिद्धान्तेष्वपि नैयायिकानां कुठारं प्रहरति। तथा च नैयायिकानां मौलिकुयक्तिनां निरासः प्राक्तनबौद्धैरभिहितेषु प्रमाणेषु समागतानामाक्षेपाणां परिहारस्तेषामभिप्रायपरिष्कारश्च प्रतिपक्षिबुद्ध्युद्भावितयुक्तिषु प्रमाणतर्काभ्यां दूषकतापादनमिति विविधप्रयासैः परमतनिरसनपूर्वकं स्वाभिमतस्थापनकौशलं सर्वथाभिनन्दनीयं शान्तरक्षिताचार्यस्य।

प्रतिवाद्यनुमतानां मतानां प्रत्याख्यानाय पद्धतित्रयं शास्त्रकारैः स्वीकृतम्। तत्र परशास्त्रसिद्धप्रमाणैः परोक्तौ दोषोद्भावनं प्रथमा, स्वशास्त्रनुमतप्रमाणेन स्वपक्षस्थापनपूर्वकः परोक्तितिरस्कारः द्वितीया, स्वपक्षानुक्त्या परशास्त्रप्रमाणानवगत्या च केवलं प्रतिभाया उपयोगेन प्रतिवादिनोऽपटुतया च तदीयमुखपिधानं तृतीय पद्धतिर्भवति। शान्तरक्षिताचार्यस्तु यथारुचि मध्यममार्गमनुसृतुकामः द्वितीयया पद्धत्या-आत्मवादे निर्दिष्टनाचार्यचतुष्टयानां हेतून् पूर्वपक्षोल्लेखपूर्वकं प्रत्याख्याति स्म।

सन्दर्भः


1. भूमिका, तत्त्वसंग्रह, बड़ौदा प्रकाशन
2. विश्व के महान बौद्धदार्शनिक- डॉ- राजेन्द्र प्रसाद शाक्य
3. आत्मानुवादचिन्तनम्, पृ-सं- 154
4. बौद्धदर्शनमीमांसा पृ-सं- 346
5. विश्व के महान बौद्धदार्शनिक, पृ-सं
6. बौद्धदर्शनमीमांसा पृ-सं- 346
7. बौद्धदर्शनप्रस्थान, पृ-सं- 197 (पद्मश्री प्रो. रामशङ्करत्रिपाठी)

8. बौद्धदर्शनप्रस्थान, पृ-सं- 197
9. बौद्धदर्शनमीमांसा, पृ-सं- 198
10. तत्त्वसंग्रहः, भूमिका
11. तत्त्वसंग्रहपञ्जिका, का-सं--1361-1362